# Shri Subrahmanyakarnamritam

# શ્રીસુબ્રહ્મણ્યકર્ણામૃતમ્

## Document Information

Text title : Subrahmanya Karnamritam

File name : subrahmaNyakarNAmRRitam.itx

Category : subrahmanya

Location : doc_subrahmanya

Author : Gopalakrishnakavi

Transliterated by : Mahaperiaval trust

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com, PSA Easwaran

Description-comments : Subramanya Sthuthi Manjari

Latest update : February 6, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 6, 2021

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યકર્ણામૃતમ્

શિવં નશ્શર્વાણીસ્તનજનિતમન્દોષ્ણમધુરં
    પયઃ ષડ્ભિર્વક્ત્રૈરુપચિતકપોલૈરપિ પિબન્ ।
હસન્હર્યશ્વાદીંશ્ચિરભવસુધાલુબ્ધધિષણાન્
    કુમારઃ પૂર્વેષાં કલયતુ ગુરૂણામપિ ગુરુઃ ॥ ૧॥

વિલજ્જન્તામજ્ઞાઃ પુરહરકુમારસ્તુતિવિધૌ
    ન જિહ્રીમશ્ચાસ્મિન્નપિ બહુ બિભીમઃ કથમપિ ।
પુરાણી વાણ્યેતત્સવિધસરણક્લાન્તચરણા
    મુહુઃ સુબ્રહ્મણ્યોમિતિ ન કિમવાદીત્પ્લુતયુતમ્ ॥ ૨॥

કથાપીયૂષં તેઽસદૃશરસમાતૃપ્તિ પિબતાં
    સતાં સ્તોકાસ્વાદા શરભવમુધા નૂતનસુધા ।
જનશ્રુત્યામેવં પરિવૃતજગત્યાં ચ બહુધા
    પ્રવર્તેરન્ કે વા ન તવ વિતતેઽપિ સ્તવપથે ॥ ૩॥

અભીષ્ટં યાચત્સુ દ્રુહિણહરિવાહાદિષુ પુરો
    યતસ્ત્રાતું પ્રાપ્તો નનુ ભવસિ મામેવ ઝટિતિ ।
તતસ્તે પાદાબ્જં પરિવહતુ તાન્તં મમ મતિઃ
    પ્રપઞ્ચે વિખ્યાતા ધ્રુવમુપકૃતૌ પ્રત્યુપકૃતિઃ ॥ ૪॥

સકૃન્નત્વા હિ ત્વાં ભજતિ કુટિલો વાઽપ્યભિમતં
    તથાપિ ક્લિશ્નાતિ પ્રકૃતિગહને કર્મવિપિને ।
જનોઽસ્મિન્કો હેતુર્ભવતિ ન વિજને ત્રિભુવને
    ન ચોલ્લઙ્ઘ્યા દૈવી સરણિરિહ કેનાપિ વિષમા ॥ ૫॥

વચોબાલા યસ્યામલગુણમનીષાસહચરી
    રહસ્સ્થાને ધ્યાને વિહરતિ તવાઙ્ઘ્રિપ્રણયિના ।
સ સન્તોષામ્ભોધેરધિજઠરમામજ્જતિ ચિરં
    નિજાપત્યામોદાદપિ ચ પરિતોષો જગતિ કઃ ॥ ૬॥

મયા તે વિક્રીતશ્ચલહૃદયદૂતઃ પદતટી-
    નિષેવાર્થં સ્વાર્થં બહુકૃપ કૃપામાપ્ય ભવતઃ ।
સમીકૃત્ય સ્વાર્થે ઘટનમુચિતં તેઽસ્ય ચલતો
    વિધિર્વિક્રેતુર્મે ધ્રુવમવગુણાચ્છાદનમપિ ॥ ૭॥

દુરારાધ્યાઃ સાધ્યાઃ કથમિવ ભવેયુર્મખભુજઃ
    પદં તે પૂર્વેષાં વચસામપ્યવિષયઃ ।
શુચા ક્રૂરેઽપારે ભવજલધિપૂરે પરિપતન્
    નિરાલમ્બો લમ્બોદરસહજ કં યામિ શરણમ્ ॥ ૮॥

સમાધાનૈર્ધ્યાનૈર્બહુવિધવિધાનૈરપિ શુચીન્
    પરિત્રાતું શક્તા જગતિ વિબુધાસ્સન્તિ બહુધા ।
અપિ ત્યાજ્યાન્વ્રાત્યાધમપતિતપાષણ્ડપિશુનૈઃ
    પરિત્રાતું શક્તસ્ત્વમિવ જગતિ ત્વં પ્રભવસિ ॥ ૯॥

તવાધારાચ્છૂરાસુરદમન સર્વામરવરાન્
    તૃણાગ્રેભ્યો મત્વા સુખમવસમાજન્મદિવસમ્ ।
વિલમ્બશ્ચેદદ્યાપ્યહહ તવ દેવાસ્મદવને
    કુમારત્વં ખ્યાતં તવ સદસિ જાયેત મહતામ્ ॥ ૧૦॥

સદા સેવં સેવં સુરપરિવૃઢત્વાધ્યવસિતાન્
    પરિશ્રાન્તેરન્યત્ફલમહમવાપં ન કિમપિ ।
ઇદાનીં ત્વત્પાદવ્યતિષજિતકર્મવ્રજમમું
    પરિત્રાયચ્છમ્ભોઃ પ્રકટય સુતત્ત્વં તવ વિભો ॥ ૧૧॥

પુરઃ પ્રાદુર્ભૂત્વા ન ભવસિ ભવાંશ્ચેન્મમ મુદે
    કુમાર પ્રક્રીડન્ ઝટિતિ ગલતિ ખ્યાતિરનઘા ।
પુનઃ પ્રાપ્તું નેદૃક્કિલ મિષતિ કાલસ્તવ મના-
    ગિયં તે વિજ્ઞપ્તિઃ પુનરપિ પુનસ્તે પુનરપિ ॥ ૧૨॥

મયિ ક્રોશત્યેવં સપદિ ન દયાં યદ્વિતનુષે
    નિદાનં કિં તત્ર જ્વલનજનિમત્ત્વં નુ ભવતઃ ।
ઉતાદ્રેઃ કન્યાયાઃ કઠિનજઠરાન્તર્વિલુઠનં
    ન વૈ જાને મ્લાનેપ્સિતકુશલયોનેઽલ્પધિષણઃ ॥ ૧૩॥

અયન્તે ભદ્રાસ્યૈ કતિચન સમાધીન્શુભધિયો

જયં તે કામાદેર્વિદધતિ શમાદ્યૈઃ પ્રહરણૈઃ ।
સ્મયન્તે યાગાદ્યૈઃ કતિચન વિધાનૈરુપચિતૈઃ
વયં તેષુ શ્રાન્તાસ્તવ વિરચયામોઽઞ્જલિમમુમ્ ॥ ૧૪॥

નગાસ્તે પઞ્ચત્વં દધતિ જડતાં દૈવતમણિઃ
પશુત્વં સા ધેનુસ્તવ ચરણદાતૃત્વયશસા ।
વિના તં ત્વાં કો નુ સ્પૃહયતિ ધનાન્ધાન્નરપશૂન્
સમારાદ્ધું ધીમાનિહ જગતિ સર્વામરગુરો ॥ ૧૫॥

શ્રુતેર્વજ્જાયન્તે પ્રથમમતિથીનાં કિલ કથાઃ
યમાયન્તે દેહિ ત્વમિતિ લિપયો યસ્ય કુધિયઃ ।
કુરુક્ષેત્રાયન્તે નટવિટસમાજાઃ સગણિકાઃ
કથં નાથન્ત્યેનં ત્વયિ સતિ જગન્નાથ કૃપણાઃ ॥ ૧૬॥

વિધત્તાં વ્યાસઙ્ગં સરસિજભવઃ શ્રૌતશિખરે
સમાધત્તાં નિદ્રાં જલધિજઠરે શ્રીપતિરપિ ।
સમેધન્તાં લીલાનટનચટુલા ધૂર્જટિકૃતાઃ
વિધીયન્તે દીક્ષા ગુહચરણધૂલ્યાસ્મદવને ॥ ૧૭॥

પ્રતિષ્ઠન્તાં સાર્ધં સપદિ મધુમત્યા દિવિષદો
ન ચાદ્યાકાઙ્ક્ષામસ્તદનુસરણં તત્કૃતફલમ્ ।
અપાઙ્ગાઃ સ્વર્ગઙ્ગાચટુલતરવીચીસહચરાઃ
તિરશ્ચકુસ્તૃષ્ણાકલિતપરિતાપં મમ વિભોઃ ॥ ૧૮॥

નમસ્તે સ્વર્ધેનોઽમરપુરતરુભ્યોઽઞ્જલિરિયં
નમશ્ચિન્તારત્નાપસરત યથાયાતમધુના ।
પ્રસાદે સેનાન્યસ્સતિ જગતિ કઃ પ્રાર્થયતિ વઃ
સુધાસિન્ધોસ્તીરે કથમિવ ભવેત્કાઞ્જિકકથા ॥ ૧૯॥

સ્વપાદસ્મર્તારં સપદિ કલયન્નાત્મસદૃશં
પુનસ્તોષાભાવાન્મૃગયતિ વરં દાતુમપરમ્ ।
યદાખ્યાપીયૂષં પિબતિ સવને દિવ્યપરિષત્
સ સુબ્રહ્મણ્યો નઃ સ્ફુરતિ પુરતઃ પૂર્ણકરુણઃ ॥ ૨૦॥

પ્રભાવસ્મિન્દીક્ષાં વહતિ મમ રક્ષાધ્વરવિધૌ
લભન્તે શોકાગ્નૌ સપદિ પશુતાં શાત્રવજનાઃ ।
ભજન્તે મોદાબ્ધાવવભૃથવિધાં બન્ધુનિવહાઃ

દિવાન્ધાશ્ચક્રાઙ્ગાઃ કથમિવ સમાનપ્રકૃતયઃ ॥ ૨૧॥

સુપર્યાપ્તા ગોપ્તું જનમતિવિપન્નં સુરગણાઃ
પટીયાન્ રેણુર્વા ગુહચરણપાથોજમથિતઃ ।
ન સન્દિગ્ધેઽધાસ્માન્ જગતિ જનતાઽઽલોક્ય તવ તદ્-
રજોલેશપ્રાપ્તાખિલસુરવરાકાઙ્ક્ષિતશિવાન્ ॥ ૨૨॥

ચિરં ભ્રામં ભ્રામં ક્વચન મરુદેશે ભવમિષે
પરિશ્રાન્તાઃ શાન્તાઃ શૃણુત વચનં કિઞ્ચન શિશોઃ ।
સમાપ્યૈતત્સર્વં સપદિ વિધિવાક્યાદધિગતં
પદે ભૂમાનન્દે દદત હૃદયં ધૂર્જટિભુવઃ ॥ ૨૩॥

પ્રિયચ્છાયાપાયાંસ્ત્યજત કુશલાયાતિમહતે
ફલાયામોહાયાર્જયત સદુપાયાનપિ ચ વઃ ।
ઉમાદાયાદાઙ્ઘ્રેરતિભયદમાયામયમયાત્
અપાયાદુદ્ધર્તા ન ભવતિ પરસ્ત્રિર્નનુ શપે ॥ ૨૪॥

અભૂમ પ્રાગેતે વયમમિતકાઙ્ક્ષાજલનિધૌ
અહો મજ્જં મજ્જં ભૃશમલભમાનાસ્તટભુવમ્ ।
ઇદાનીં સ્વારાજ્યં તૃણમપિ સમં યચ્ચરણજાત્
પ્રસાદાત્પશ્યામઃ કિમિહ વરયામોઽદ્ય વરદમ્ ॥ ૨૫॥

પતન્તી રુદ્રાદ્રેઃ શ્રુતિભુવિ ગલન્તી ક્ષિતરુજો
દલન્તી શૂરાદીનપિ પરિકૃષન્તી તટતરૂન્ ।
હરન્તી સન્તાપાન્પુનરપિ પુનન્તી સ્મૃતિવશાત્
સ્રવન્તી કાપ્યેષા વિલસતિ વહન્તી મમ પુરઃ ॥ ૨૬॥

અતિક્રૂરોઽરાતિષ્વમિતશમપૂરો મુનિજને
કઠોરો વીરત્વે કુસુમસુકુમારોઽપિ હૃદયે ।
રુચોદ્યત્સૂરોઽસાવમૃતકરપૂરોઽલ્પહસિતે
સુમન્દારોઽસ્માકં જયતિ સ કુમારો ગિરિભુવઃ ॥ ૨૭॥

નમોવાકં બ્રૂમો નયનરમણીયાય શિવયોઃ
તદઙ્કાલઙ્કારં કમપિ વિદધાનાય ચ મુહુઃ ।
તયોઃ પ્રેમામ્ભોધેઃ શરદુદિતરાકાશશભૃતે
પરસ્મૈ કસ્મૈચિત્ત્રિયુગવદનાયાદિમહસે ॥ ૨૮॥

તુલાકોટિક્વાણસ્ફુરણલલિતાભ્યાં ત્રિજગતાં
    પરં પિત્રોર્નેત્રોત્સવદનટનાભ્યાં ચ કૃતિનામ્ ।
મનોહર્મ્યે રાજત્કનકકલશાભ્યાં શ્રુતિશિરો-
    વિમૃગ્યાભ્યાં પદ્ભ્યાં નતસુરતરુભ્યાં નતિરિયમ્ ॥ ૨૯॥

ક્કણદ્ભ્યાં પાણિભ્યાં રણિતચરણાભ્યાં મણિતલે
    સ્ખલદ્ભ્યાં જાનુભ્યાં કલિતગમનં સાર્ધવચનમ્ ।
અનાદ્યોર્દમ્પત્યોઃ સુકૃતમિવ મૂર્તં નયનયોઃ
    અદૃષ્ટ્વેદં તેજઃ કથમિવ કૃતી ખલ્વિહ જનઃ ॥ ૩૦॥

પાયાત્કુશલકરણ્ડઃ પુષ્કરમાલાપરીવૃતશિખણ્ડઃ ।
તાડિતતામસષણ્ડઃ તારકતામિસ્રતરુણમાર્તાણ્ડઃ ॥ ૩૧॥

નેત્રીભૂતઃ શિવયોઃ કશ્ચન પત્રીકૃતોરગાહારઃ ।
પાત્રીભવતુ પુરો મે ધાત્રીકૃતકૃત્તિકોઽક્ષિયુગળસ્ય ॥ ૩૨॥

અમ્ભોજપત્રનેત્રઃ કુમ્ભોદ્ભૂતાદિતામરસમિત્રઃ ।
શમ્ભોઃ પ્રમોદપુત્રઃ સ્તમ્ભો જગતાં સમેધતાં ચિત્રઃ ॥ ૩૩॥

ક્ષન્તા નતમન્તૂનાં ગન્તા ગજરાજમદભરં ભઞ્જન્ ।
કાન્ત્યા કનકનિયન્તા ક્રૌઞ્ચનિહન્તા કદા નુ હૃદિ રન્તા ॥ ૩૪॥

નિગમશિખરાલવાલો વલ્લીમલ્લીલતાઞ્ચિતસ્કન્ધઃ ।
કશ્ચન સુરસાલો નો વૃશ્ચતુ પાશ્ચાત્યજન્મસન્તાપમ્ ॥ ૩૫॥

શાસિતદૈત્યકદમ્બઃ શમધનચેતસ્તટાકકાદમ્બઃ ।
આસીન્મમાવલમ્બઃ શક્તનૂજાલસાક્ષ્યલિકદમ્બઃ ॥ ૩૬॥

યજ્ઞાવઘુષ્ટનામા પ્રાજ્ઞાલાપાભિરામગુણસીમા ।
પરમેશ્વરયોઃ પ્રેમાલઙ્કૃતસામા મમાસ્તુ શુભભૂમા ॥ ૩૭॥

સનકાદિસિદ્ધસેવ્યો જનકો જગતાં શિવઙ્કરઃ શિવયોઃ ।
કનકદ્રવનીકાશઃ શનકૈઃ શનકૈરુદેતિ પુરતો નઃ ॥ ૩૮॥

ષણ્મુખ! મુખજિતશશધર! ધરજાઙ્કવાસ! વાસવાદ્યર્ચ્ય ।
અર્ચિષ્મદધિકકાન્તે કાન્તે જગતાં પદે વિધેહ્યસ્માન્ ॥ ૩૯॥

કઞ્જભવવચનગેહં કાઞ્ચનસહકારિકિરણસન્દોહમ્ ।
શ્રિતરક્ષાસન્નાહં શિવયોર્મૂર્તં શ્રયામહે સ્નેહમ્ ॥ ૪૦॥

વન્દેમહિ મન્દેહાસુરહરસન્દેહદાયિ દેહરુચિમ્ ।
કુરુવિન્દકાન્તિચેલં બાલં શિવયોઃ કિમન્યદવશિષ્ટમ્ ॥ ૪૧॥

મણ્ડિતવેદશિખણ્ડૈઃ ખણ્ડિતદનુજૌઘચણ્ડભુજદણ્ડૈઃ ।
ચણ્ડીશભાગ્યષણ્ડૈઃ દણ્ડિતદુરિતોઽસ્મિ મઙ્ગલકરણ્ડૈઃ ॥ ૪૨॥

કુલ્લારવિન્દદામ્ના કલ્હારાદ્રીન્દ્રશત્રુઙ્ગકૃતધામ્ના ।
નામ્ના રઞ્જિતસામ્ના કેનચિદારાજિ મઙ્ગલમહિમ્ના ॥ ૪૩॥

અલમલમશક્તિહસ્તૈઃ અમુકુટમસ્તૈરવેદવિન્યસ્તૈઃ ।
ભક્તાનામસમસ્તૈઃ અપરૈરમહેશ્વરાઙ્કુતલશસ્તૈઃ ॥ ૪૪॥

દૂરાદદાહિ દુરિતં શૂરાદ્યસુરૌઘતૂલદહનેન ।
સારેણ કેનચિન્મે મારારાતેર્ગૃહસ્થભાવસ્ય ॥ ૪૫॥

આશાસ્મહે સદા વયમાશાધીશોચ્ચમૌલિપીઠાય ।
શ્રુતિચૂડોત્તંસાય પ્રમથાધીશાત્મજાઙ્ઘ્રિકમલાય ॥ ૪૬॥

આમ્નાયશિખરવેદ્યાદાનતસલ્લોકભવરુજાં વૈદ્યાત્ ।
આદ્યાચ્ચરાચરાણાં હૃદ્યાત્પિત્રોઃ કિમન્યદવલમ્બે ॥ ૪૭॥

અમરાભયઙ્કરાણાં તિમિરારીણામપાઙ્ગસુષમાસુ ।
ચમરાણાં શ્રુતિવન્ચા વયમિહ દાસાશ્ચિદિન્દુકિરણાનામ્ ॥ ૪૮॥

પર્યાપ્તચન્દ્રવદને પર્વતપુત્રીશુભાઙ્કમણિસદને ।
પરિહૃતસુરારિકદને મદને વલ્લ્યા મનોઽવલગ્નં નઃ ॥ ૪૯॥

તરુણારુણકિરણાવલિપરિણામસ્ફુરણચરણતરુણાબ્જે ।
ચરણાયુધધ્વજેઽહં કરુણામ્ભોધૌ નિમગ્નભાવોઽસ્મિ ॥ ૫૦॥

યસ્મિંસ્ત્રેધા વિલસતિ મૃષા જાગતી વૃત્તિરેષા
    યસ્ય સ્ફૂર્ત્યાં વ્રજતિ સહસા ચિન્મયી તન્મયીત્વમ્ ।
યોઽસ્તં યાતે સ્ફુરતિ હૃદયે નિર્વિકલ્પે સમાધૌ
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૫૧॥

યસ્યૈકાંશાજ્જગતિ સકલાઃ પ્રાણિનઃ પ્રાણવન્તઃ
    યસ્યાખ્યાને નિગમશિખરં નાપ કાં કામવસ્થામ્ ।
નાન્તશ્શોકો ભવતિ ભજતાં યસ્ય લેશોપલબ્ધેઃ
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૫૨॥

ક્લાન્તાઃ ક્લાન્તા યમનુ નિગમાઃ સઙ્ગિરન્તે ગિરં તે
    યન્નિર્ણેતું સપદિ મુનયઃ સાધ્વસં તે લભન્તે ।
મૌનેનૈવાભિનયતિ જગદ્દેશિકો યસ્ય તત્ત્વં
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૫૩॥

યસ્યાવાપ્ત્યૈ શમધનતતિર્યાતિ નાનાપથેન
    પ્રાપ્તો યો યૈર્જગતિ વિરળાઃ સર્વથા સર્વદા તે ।
યઃ પ્રાપ્યેતાશ્રિતશમદમૈઃ સંયમે સ્વાત્મરૂપઃ
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૫૪॥

નાશાપાશાકુલિતમનસાં ભાસતે યત્પ્રભાવો-
    ઽપ્યાત્માધારં નિખિલકરણં નેક્ષતે યં પરાક્ત્વાત્ ।
જાનન્ત્યન્યે ક્વચન સમયે યન્મયાનેવ સર્વાન્   (જાનતેઽન્યે)
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૫૫॥
પ્રાણાપાનૌ ગલિતગમનૌ યત્ર યત્રાન્તરઙ્ગં
    નિર્વ્યાસઙ્ગં નિખિલકરણં યત્ર લુપ્તપ્રમાણમ્ ।
તત્રાસીના દદૃશુરપરે ભાસુરાન્યત્પ્રસાદાન્
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૫૬॥

કિં નીહારઃ કિમમૃતકરઃ કિં રવિઃ કિં નુ ધૂમઃ
    કિં ખદ્યોતઃ કિમુ હુતવહઃ કિં તટિત્ કિં નુ હીરઃ ।
ઇત્યુલ્લેખ્યો ભવતિ યમિભિર્યત્પ્રસાદઃ સમાધૌ
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૫૭॥

મૂલાધારે હૃદિ મણિપુરે સ્વાસ્પદે તાલુમૂલે
    ચેતસ્સ્થાને ધ્રુવશશિગૃહે નૈકધા સિદ્ધિલુબ્ધાઃ ।
યં કુર્વન્તઃ સપદિ કૃતિનઃ સ્વેપ્સિતાન્યાપ્નુવન્તિ
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૫૮॥

બ્રાહ્મીં ગ્રન્થિં પ્રથમમથ તાં વૈષ્ણવીં તાં ચ રૌદ્રીં
    ભિત્ત્વા કેચિન્નિયતમરુદાબદ્ધચેતશ્શલાક્યા ।
પ્રૌઢોન્મન્યાસ્સુરતસમયે યત્સ્વરૂપા ભવન્તિ
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૫૯॥

મુગ્ધસ્મેરાનનકમલયા નાગરાજન્યપુત્ર્યા
    સૌધે જ્યોત્સ્નાસ્ફુરણવિશદે નિર્ભયં કેઽપિ રન્ત્વા ।

પાદાબ્જીયાં મધુરમધુરાં યસ્ય માધ્વીં પિબન્તિ
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૬૦॥

ઉત્તિષ્ઠન્ત્યામુરગયુવતૌ મઞ્જુમઞ્જીરનાદં
    મન્દં મન્દં મુખસરસિજં મુક્તિમાદર્શયન્તીમ્ ।
આલિઙ્ગન્તં સુલભમિતરે યત્કૃપાપાઙ્ગસઙ્ગાત્
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૬૧॥

પ્રાજ્યે રાજ્યે કલિતહૃદયાઃ કેઽપિ કેઽપ્યધ્વરાજ્યે
    યોગૈશ્વર્યે કતિચન નિજાવાપ્તિસૌખ્યેઽપિ કેઽપિ ।
સમ્પ્રાપ્તેષ્ટાસ્સપદિ સકલા યત્કૃપાપાઙ્ગસઙ્ગાત્
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૬૨॥

તારં તારં ભવજલનિધેર્યન્મનોરગ્રભાગે
    નિક્ષિપ્યાન્યે શરવણભવેત્યન્તરેવાલપન્તઃ ।
આલિઙ્ગન્તે સ્વયમુપનતાં મુક્તિકાન્તાં પ્રસન્નાં
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૬૩॥

માયાનૂરુર્મનુવરરવિર્દેશિકેન્દ્રો દયાર્દ્રઃ
    ઉદ્યન્નેનસ્તિમિરપટલીં શોચયન્શોકઘૂકાન્ ।
યસ્યાનન્દં દિશતિ પરમં ભક્તકોકાવલીનાં
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશન્ત્યૈ ॥ ૬૪॥

યન્મન્ત્રસ્યામરપુરતરોઃ કામમૂલસ્ય મૂલે
    તિષ્ઠન્તો યે નિખિલતરુણીનેત્રનીલોત્પલાનામ્ ।
જાયન્તે તેઽપ્યમૃતરુચયો મૂર્તિમન્તશ્ચ કામાઃ
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૬૫॥

વાગાસ્વાદ્યા મનુનવસુધા લિહ્યતે યૈર્યદીયા
    તેષાં વક્ત્રાદ્વહતિ કવિતાકૈતવાત્સ્વઃ સ્રવન્તી ।
કિઞ્ચાશેષં ભુવનમયતે દાસતામીક્ષ્યમાણં
    પ્રેમસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૬૬॥

યન્મન્ત્રેન્દુર્જલધિતનયાજ્યોત્સ્નયા દ્યોત્યમાનઃ
    ચિત્તાકાશે સ્ફુરતિ વિમલે યસ્ય તસ્યોત્તમસ્ય ।
આપત્તાપઃ પ્રશમમયતે વૃદ્ધિમામોદસિન્ધુઃ
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૬૭॥

મન્ત્રાકારામમરતટિનીં ચન્દ્રશૈલાદ્વહન્તીં
    યસ્યાચાર્યપ્રસૃમરકૃપાસારપીયૂષપૂરામ્ ।
દિષ્ટ્યા દૃષ્ટ્યા જગતિ વિષયીકુર્વતાં ક્વાભિતાપાઃ
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૬૮॥

ત્રેધા સાધ્યં જ્વલનલલનાવર્મપાશાઙ્કુશાદીન્
    શિષ્ટાદિષ્ટે વપુષિ વિદધન્ યન્મનોઃ કામધેનોઃ ।
દુગ્ધં દુગ્ધં પિબતિ કુશલં સ્વેષ્ટમાયાસશૂન્યં
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૬૯॥

ષટ્ત્રિંશારૈસ્સહિતમનુભિર્નાગપત્રૈસ્સવીરૈઃ
    સાઙ્ભિઃ પર્ણૈઃ સકમલવરાસ્ત્રાદિભિર્વૃત્તભૌમૈઃ ।
યુક્તં યન્ત્રં દિશતિ ભજતાં યસ્ય સર્વાન્પુમર્થાન્
    પ્રેમાસારઃ પરમશિવયોઃ સોઽસ્તુ નસ્તાપશાન્ત્યૈ ॥ ૭૦॥

નાકાધીશવિરોધિવામનયના કોકવળીવિસ્ફુર-
    ચ્છોકામ્ભોનિધિશારદાભ્રવિલસદ્રાકાનિશાનાયકમ્ ।
કેકામઞ્જુલપક્ષિપુઙ્ગવરથં પાકારિજાકામુકં
    પ્રાકારં દૃઢમાશ્રયે દિવિષદામેકાક્ષરાર્ધં પરમ્ ॥ ૭૧॥

પારાશર્યવચઃ પ્રપઞ્ચતટિનીપૂરાત્મકેળીલવો
    દૂરાન્મુક્તશરપ્રવાહશમિતક્રૂરાસુરોષર્બુધઃ ।
મારારાતિવધૂશુભોદરસુધાવારાશિચિન્તામણિઃ
    ઘોરા દુઃખપરમ્પરાઃ શમયતુ સ્મેરામૃતૈરદ્ય નઃ ॥ ૭૨॥

શેષાદ્રીશ્વરમૌલિકેલિસદના ભાષાધિદેવ્યુલ્લસદ્-
    ભાષા ભૂતગણામરારિપરિષદ્વેષા પરા દેવતા ।
એષાઽઽસ્તાં મમ માનસે શિવશિવોન્મેષા તુરાષાડ્ભવદ્-
    યોષાઽઽલિઙ્ગિતવિગ્રહા પ્રતિદિનં તોષાય ભૂષા શ્રુતેઃ ॥ ૭૩॥

કાન્ત્યા ન્યક્કૃતબાલભાનુસુમુખઃ શાન્ત્યાદિભિસ્સેવિતઃ
    ક્ષાન્ત્યા કાચન ભૂમિરેવ ભજતાં ભ્રાન્ત્યાપદિધ્માનલઃ ।
ભાન્ત્યાઽવ્યાજકૃપારસૈરભિમુખં યાન્ત્યા દૃશાં માદૃશાં
    હન્ત્યાધીન્યદસૌ કિમન્યદિહ નો માન્ત્યાલમિન્દ્રશ્રિયા ॥ ૭૪॥

ભીમારાતિવનાનલસ્સુરપુરીરામાભિરામાકૃતિઃ

સામાભિષ્ટુતપાદપદ્મવિભવસ્સીમા દયાસમ્પદામ્ ।
સોમાનન્દકરઃ પરં સુમનસાં ક્ષેમાવહપ્રક્રિયઃ
કામાનેષ તનોતુ નઃ પ્રતિદિનં પ્રેમાલસૈર્વીક્ષણૈઃ ॥ ૭૫॥

આદાવાહિતચેતસામનુદિનં વેદાવલીનાં સતાં
નાદાવિષ્કરણક્ષણે પ્રકટયન્પાદારુણં પાવનમ્ ।
ખેદાન્ ખણ્ડયતિ સ્મ યોઽતિવિષમાન્ ભેદાન્ધકારોદિતાન્
શ્રીદાકાઙ્ક્ષિતસમ્પદં દિશતુ મે મોદાકરઃ શૂલિનઃ ॥ ૭૬॥

નેતા ધર્મપથે સદૈવ ચરતાં જેતાઽન્યથાવર્તિનાં
કેતાવાહિતકુક્કુટઃ પ્રતિરણં વેતાળસઙ્ઘસ્તુતઃ ।
આતામ્રૈર્નયનાઞ્ચલૈર્યદિ સ માં શીતાંશુબિમ્બસ્પૃશૈઃ
પ્રીતાન્તઃકરણો નિરીક્ષિતુમહં ક્રેતાસ્મિ શક્રશ્રિયામ્ ॥ ૭૭॥

હેલાભર્જિતસર્વલોકદિતિભૂહાલાહલેનાઙ્ગુલી-
લીલાભિઃ શિવયોઃ પ્રમોદજલધેર્વેલાવલીં પ્લાવયન્ ।
જ્વાલાજાલજટાલશક્તિવિલસત્સાલાભભાસ્વદ્ભુજઃ
ખેલાં નઃ પુરતસ્તનોતુ સુરરાડ્બાલાવિલોલાન્તરઃ ॥ ૭૮॥

રમ્ભાદિસ્ફુરદાભિરૂપ્યવિલસદ્દમ્ભાવલોપિપ્રભા-
જમ્ભારાતિસુતાઘનસ્તનપરીરમ્ભાવગાઢોરસે ।
સ્તમ્ભાયાખિલવિષ્ટપસ્ય કુશલારમ્ભાય નાકૌકસાં
શુમ્ભાદિત્રિદશારિતૂલહુતભુગ્ડિમ્ભાય ભૂયો નમઃ ॥ ૭૯॥

ક્ષુદ્રાણાં દનુજન્મનાં ચ વિનતાભદ્રાવલીનામપિ
છિદ્રાણ્યપ્રતિલભ્ય બાલકતયા વિદ્રાવણે દીક્ષિતઃ ।
રુદ્રાણીસ્તનનૂતનામૃતઘટીમુદ્રાયિતૌષ્ઠાધરઃ
નિદ્રાં દ્રાવયતાન્મમાદ્ય બહુધાઽભદ્રાં સ રુદ્રાત્મજઃ ॥ ૮૦॥

ભાસા સારસબાન્ધવં નયસુધાકાસારમેવાશયે
નાસાપ્રીણનસાયકં તનુરુચા દાસાયિતાશાધિપમ્ ।
યા સાનન્દમપેક્ષતે ન રહસે કા સાત્ર સોઽસ્મન્મનો-
વાસાયાદ્ય કૃતાદરો વયમતઃ કાસાં શ્રિયાં નાશ્રયાઃ ॥ ૮૧॥

ગઙ્ગાવિશ્રુત કર્મનર્મસચિવાપાઙ્ગામૃતોર્મિચ્છટા-
સઙ્ગામૃષ્ટવિશિષ્ટશિષ્ટજનતાતુઙ્ગાઘસઙ્ઘાનલમ્ ।
શક્રાઙ્ગારોજ્જ્વલકેલિસંહતિનટીરઙ્ગાયિતેન્દ્રાત્મજા-

નઙ્ગાદ્વૈતમુપાસ્મહે વયમમી ભઙ્ગાય તુઙ્ગાપદામ્ ॥ ૮૨॥

શાન્તાન્તઃકરણાલયે વૃષસુતાકાન્તાભિરૂપ્યે કૃપા-
ઽઽક્રાન્તાન્દોલિતશોણલોચનદલપ્રાન્તાવધૂતાપદિ ।
સ્વાન્તાન્યાદધતે ન યે શિવસુતે ભ્રાન્તાસ્તુ તે સંશય-
શ્રાન્તાઃ સન્તુ પદે પદે ભવપથે કિં તાવતા નઃ ક્ષતિઃ ॥ ૮૩॥

સ્વેક્ષાધીનચરાચરોદયલયો લાક્ષાસદૃક્ષચ્છવિઃ
સાક્ષાન્નિર્જરકાનનક્ષિતિરુહઃ પ્રેક્ષાવતાં કાઙ્ક્ષિતઃ ।
દીક્ષામદ્ય દધાતુ દાતુમતિ મે દ્રાક્ષાસદૃક્ષાં ગિરં
રૂક્ષામાધિવિજૃમ્ભિતાં શમયિતું દાક્ષાયણીનન્દનઃ ॥ ૮૪॥

વાચાતીતપદામ્બુજાતવિભવં પ્રાચામૃષીણાં પુનઃ
નીચારિવ્રજજીર્ણપર્ણદહનં ખેચારિકેલીરથમ્ ।
મોચામર્મકૃષા મનોજ્ઞવચસા યાચામહે કં વરં
ધીચાઞ્ચલ્યમપાકરોતુ જગતામાચાર્યવર્યો મમ ॥ ૮૫॥

સંસારામયભેષજં શમદમાહિંસાપરારાધિતં
હંસાલઙ્કૃતકોમલશ્રુતિશિરોત્તંસાઙ્ઘ્રિપાથોરુહમ્ ।
પુંસાનાદિમતા પ્રકાશિતભુજાશંસાપદાનક્રમં
કંસારાતિસુતાકપોલરુચિરોચ્ચાંસાગ્રમારાધ્નુમઃ ॥ ૮૬॥

ચાપાસિત્રિશિખાદિભૂષિતભુજવ્યાપારતુષ્ટામર-
સ્ત્રીપાણ્યબ્જવિકીર્ણકલ્પકુસુમશ્રીપાટલાઙ્ગદ્યુતિઃ ।
પાપાત્માનુપલભ્ય દિવ્યનગરીભૂપાત્મજાકામુકઃ
તાપાન્નસ્સમપાકરોતુ મહિતૈઃ શ્રીપાદપદ્મામૃતૈઃ ॥ ૮૭॥

બાહાસઞ્જિતતીક્ષ્ણહેતિરુચિભિઃ સ્વાહાસહાયો મુહુઃ
હાહાઙ્ગીકૃતવન્દિભાવસરણિર્વાહાયિતાખણ્ડલઃ ।
નીહારાદ્રિસુતાત્મજો દિવિષદાં સાહાય્યકારી મૃધે
દાહાનાશુ ધુનોતુ નસ્સુમનસામાહારરીત્યા ગિરા ॥ ૮૮॥

ઈશાનાઙ્કમનોજ્ઞસૌધમમિતક્લેશાન્ધકારારુણં
કોશાગારમપેક્ષિતાર્થવિતતેઃ પાશાયુધારાધિતમ્ ।
કાશાચ્છસ્મિતચૂર્ણમોહિતહૃષીકેશાત્મજાલોલુપં
ધીશાન્ત્યાદિ શુભાય સર્વવિપદાં નાશાય ચાશાસ્મહે ॥ ૮૯॥

અઙ્કે કલ્પિતદેવરાજતનયં લઙ્કેશદર્પચ્છિદં
સઙ્કેતાલયમાદિવાઙ્મૃગદૃશાં પઙ્કેરુહં પાદયોઃ ।
કઙ્કેલિદ્રુમકુઞ્જકેલિસદનં તં કેશવાનન્દનં
કિં કેલ્યા નમતાં ચ મુક્તિરિતિ ચેચ્છઙ્કેઽનલશ્શીતલઃ ॥ ૯૦॥

સમ્પાતેન નિજાયુધસ્ય વિલસચ્છમ્પાસનાભેર્જગ-
ત્કિમ્પાકં કલયન્તમન્તકસભાસમ્પાતુકં તારકમ્ ।
કમ્પાક્રાન્તધિયા ન ધર્તુમનિશં યં પારયન્તે જનાઃ
તં પારે તમસાં સ્થિતં કલયતાં કિં પામરૈઃ પાર્થિવૈઃ ॥ ૯૧॥

ગત્યા શિક્ષિતદૃપ્તસિંહગમનૈઃ શક્ત્યા સ્ફુરદ્બાહુભિઃ
પ્રીત્યા પોષિતભક્તલોકનિવહૈઃ શ્રુત્યાઽઽત્તબન્દિક્રમૈઃ ।
રત્યાઽઽપ્તૈર્નિજકાન્તિભિઃ કતિપયૈરેત્યાત્ર યદ્ભૂયતે
તત્યા કિં મમ સામ્પ્રતં દિવિષદાં ભૂત્યાણિમાદ્યાપિ ચ ॥ ૯૨॥

કાલં દૈવતવિદ્વિષાં ગલવલન્માલં સુરેન્દ્રાત્મજા-
લોલં શક્તિશિખાવિદારિતમહાશૈલં દિવશ્ચારિણામ્ ।
સાલં પાદરુચાહતાશ્રુતતમોજાલં ભવેદ્રક્ષિતું
કોઽલં નો જગતાં ત્રયેઽપિ ચ પરો બાલં વિના શૂલિનઃ ॥ ૯૩॥

ધર્માન્તધ્વનદભ્રવિભ્રમધનુશ્ચર્માસિભાસ્વદ્ભુજો
વર્માલઙ્કૃતવિગ્રહઃ પ્રતિદિનં શર્માપહો વિદ્વિષામ્ ।
ધર્માદ્યર્થશુભાલયો મુનિમનોભર્માસનાધિષ્ઠિતો
નર્માણિ પ્રતિપદ્યતાં મનસિ મે મર્માદિવાક્સન્તતેઃ ॥ ૯૪॥

સ્વર્વાસિશ્રમશઋઙ્ખલાઃ શિથિલયન્સર્વાશ્ચ શર્વાજ્ઞયા
કુર્વાણો વિપદઃ પ્રકામમવનીગીર્વાણવિદ્વેષિણામ્ ।
અર્વાચીનવચસ્સુદૂરમહિમા દુર્વાસસાભ્યર્ચિતઃ
ગુર્વાજ્ઞાવશવર્તિનો હરતુ મે દુર્વારદુર્વાસનાઃ ॥ ૯૫॥

શિષ્ટાનાં વિશિનષ્ટિ તુષ્ટિમમિતાં કષ્ટાનિ નષ્ટં નય-
ત્યષ્ટાઙ્ગસ્ય પુરસ્તનોતિ નયનાભીષ્ટાન્ શિશુત્વક્રમાન્ ।
ક્લિષ્ટાક્લિષ્ટગતીઃ પિનષ્ટિ મનસસ્તુષ્ટાત્મનાં સંયમે
સ્પષ્ટાસ્પષ્ટગિરાદ્ય તેન શિશુના નષ્ટાખિલાપન્મમ ॥ ૯૬॥

આધારામ્બુજમધ્યકેલિસદનો બાધાવહોઽહઙ્કૃતેઃ
બોધાનન્દવિવર્તભાસુરતનુર્મેઽધોઽધિમૂર્ધં જ્વલન્ ।

રાધાવલ્લભમાનિતાત્મવિભવોઽગાધાં વિધત્તાં શ્રિયં
    ક્રોધાધેર્વિજયં શચીપ્રિયતમાસાધારણીં ચ પ્રથામ્ ॥ ૯૭॥

ગાઢાભ્યાસવિનિદ્રિતોરગસુતાલીઢાનિલાનાં સતાં
    ગૂઢાવાસમુપેત્ય ચેતસિ પરં સોઢા સમસ્તૈનસામ્ ।
બાઢાજ્ઞાનપિશાચિકાવૃતમહામૂઢાત્મનાં દુર્લભઃ
    ષોઢાસ્યામ્બુરુહશ્શુભાનિ જગતાં વોઢા વિધત્તાં મમ ॥ ૯૮॥

આગોપાલવિધાતૃતુલ્યવિભવે યાગોપગેયપ્રથે
    વેગોદ્ભિન્નપુનર્ભવાઙ્કુરમહાયોગોપસર્ગાપદિ ।
રોગોત્સિક્તજનાનવાપ્ય ચરણેનાગોપગીતાત્મજે (વીતાનુજે)
    ભૂગોળેઽભિરતિં ન કો નુ કલયેદ્રોગો ન ચેદ્રાજસઃ ॥ ૯૯॥

ઓષ્ઠાસઞ્જિતલોચનાય દિવિજશ્રેષ્ઠાત્મજાયા જગ-
    જ્જ્યેષ્ઠાનઙ્ગવિવર્તવિગ્રહવતે પ્રેષ્ઠાય શિષ્ટાવને ।
ગોષ્ઠાયાદિગવાં તતેર્ભુવનવર્ષિષ્ઠાય સભ્યાન્તરે
    નિષ્ઠાયાશ્રિતલોચનાબ્જયુગનેદિષ્ઠાય કુર્મોઽઞ્જલિમ્ ॥ ૧૦૦॥

સીમ્ને સદ્ગુણસમ્પદાં નવમણીધામ્ને શ્રિતાપદ્દ્વિષ-
    ન્નામ્ને શાસિતદૈવતારિપરિષત્સ્થેમ્ને ચ હેમ્ને શ્રિયા ।
વ્યોમ્ને ચિદ્વિમલાય સર્વજગતાં ધામ્ને નિકેતીભવ-
    ત્સામ્નેઽનાદિકુટુમ્બિભાગ્યલહરીભૂમ્ને પરસ્મૈ નમઃ ॥ ૧૦૧॥

પરયુવતિરતં માં શઙ્કયિત્વાઽપ્યુદાસે
    તદપિ મદવનં તે સામ્પ્રતં સામ્પ્રતં હિ ।
ત્યજતિ ગુરુકલત્રવ્યાપૃતં ત્વત્પિતા કિં
    વિમલકમલસમ્પદ્દ્રોહિણં રોહિણીશમ્ ॥ ૧૦૨॥

પરધનાપહૃતૌ યતમાને નોચિતા મયિ તવેયમુપેક્ષા ।
વિસ્મૃતં કિમુ હિરણ્યહરત્વં તત્ત્વયા તવ વિભોઃ શ્વશુરસ્ય ॥ ૧૦૩॥

અહિંસકાનામિહ હિંસકોઽપિ ન તેઽચ્છિદં બ્રહ્મશિરઃ પિતેવ ।
અતીવ લુબ્ધં કિમુપેક્ષતે માં લુબ્ધાત્મજા સાપિ તવાઙ્કસંસ્થા ॥ ૧૦૪॥

મલિનસઙ્ગતિદૂષિતમેવ માં કિમુ વિલોકયિતું પરિશઙ્કસે ।
ન હિ ભવાનિવ ભૂતપિશાચિકાસદસિ સન્તતમાસિતુમુત્સહે ॥ ૧૦૫॥

નિષ્કિઞ્ચનોઽયમિતિ કિં નનુ મય્યુદાસે

ભિક્ષાશનસ્તવ પિતા ભગવંસ્તદાસ્તામ્ ।
ત્વં ચાપિ ભૈક્ષમટસિ પ્રકટં ફલિન્યાં
તન્માં ભજસ્વ સદૃશી ખલુ બન્ધુતા નૌ ॥ ૧૦૬॥

પરિપાલયિતું તવાભિકાઙ્ક્ષા યદિ દૃપ્તાન્કૃપણોત્તમાગ્રવૃત્ત્યા ।
કિમુ કીર્તિરિતસ્તવાપ્યપૂર્વા વિમલા દીનદયાલુતોપક્લૃપ્તા ॥ ૧૦૭॥

અઙ્ગીકૃતં મૃગશિશું ન શશી જહાતિ
ફાલં તપન્તમપિ નો દહનં ત્રિણેત્રઃ ।
આશીવિષં ચ વિષમં ન હિ શેષશાયી
તીક્ષ્ણસ્વભાવમપિ માં ન જહીહિ પાલ્યમ્ ॥ ૧૦૮॥

કણ્ઠે ગડુર્ભવતિ યચ્છરદિન્દુકાન્તેઃ
અર્ધાસનં ભજતિ યત્સુરભોજ્યલક્ષ્મ્યાઃ ।
આચાર્યતાં ભજતિ યન્નવમલ્લિકાનાં
આનન્દમાવહતિ તે સ્મિતમેવ તન્નઃ ॥ ૧૦૯॥

અથવા ક્ષણિકાચલાલવાલો ગુણપુષ્પઃ પરિસેવિતો દ્વિજેન્દ્રૈઃ ।
શ્રુતિમુગ્ધલતાઞ્ચિતોઽઙ્ઘ્રિશાખી તવ દિવ્યઃ ફલતીપ્સિતં મમૈષઃ ॥ ૧૧૦॥

કિં વા વિપદિ વિધેયં ધ્યેયં તે ધ્યાતૃમઙ્ગલં ચરણમ્ ।
સમ્પદિ કિં કરણીયં ભૂયો ભૂયોઽપરોક્ષણીયં તત્ ॥ ૧૧૧॥

બદ્ધાદરાઃ શ્રિતવિપત્પરિતાપશાન્ત્યૈ
દુગ્ધાબ્ધિગર્ભભરિતામૃતવીચિવન્દ્યાઃ ।
મુગ્ધાબ્જજન્મવિફલીકરણસ્વભાવાઃ
શ્રદ્ધાલવોઽવિતુમમી તવ માં કટાક્ષાઃ ॥ ૧૧૨॥

અમૃતમિવ સુરાણાં બ્રાહ્મણાનાં ત્રયીવ
પ્રણવ ઇવ યતીનાં યોગિનામુન્મનીવ ।
શ્રુતિપથપથિકસ્ય શ્રીમદેકં નિદાનં
મમ તુ કિમપિ લબ્ધં લુબ્ધકન્યાભિલુબ્ધમ્ ॥ ૧૧૩॥

પાતય વા ઘાતય વા પાલય વા સમવલોક્ય લાલય વા ।
લબ્ધં તવ પદયુગ્મં નાહં મુઞ્ચામિ નાપિ દુર્વૃત્તીઃ ॥ ૧૧૪॥

નમો નમસ્તે નગદમ્ભભેદિન્
નમો નમસ્તે નિગમાન્તચારિન્ ।

નમો નમસ્તે ખગરાજયાયિન્
 નમો નમસ્તે ભગવન્ પરાત્મન્ ॥ ૧૧૫॥

શ્રીશઙ્કરાત્મજગુણગણગ્રથિતા તદીય-
 પાદારવિન્દમકરન્દકણાવસિક્તા ।
મોદાવહા ભવતુ સજ્જનષટ્પદાનાં
 ગોપાલકૃષ્ણકવિવાક્ સુરપુષ્પમાલા ॥ ૧૧૬॥

ઇતિ શ્રીગોપાલકૃષ્ણકવિવિરચિતં શ્રીસુબ્રહ્મણ્યકર્ણામૃતં સમ્પૂર્ણમ્ ।

Proofread by Sivakumar Thyagarajan shivakumar24 at gmail.com, PSA Easwaran

*Shri Subrahmanyakarnamritam*
pdf was typeset on February 6, 2021

Please send corrections to *sanskrit@cheerful.com*